JETIR.ORG ISSN: 2349-5162 | ESTD Year : 2014 | Monthly Issue
JOURNAL OF EMERGING TECHNOLOGIES AND INNOVATIVE RESEARCH (JETIR)
An International Scholarly Open Access, Peer-reviewed, Refereed Journal

# महाभारते त्रिपुरासुरसंहारकथा - एकमध्ययनम्

## (Mahābhāratē tripurāsurasaṁhārakathā ēkamadhyayanam)

**CH. DURGA SYAM PRASAD**, Sanskrit Research Scholar, Dept. of Telugu & Oriental Languages, Acharya Nagarjuna University, Nagarjuna Nagar, Guntur, Andhra Pradesh

## शोधपत्रसारः – [ABSTRACT ]

महेश्वरे वा जगतामधीश्वरे जनार्दने वा जगदन्तरात्मनि ।
न वास्तु भेद प्रतिपत्तिरस्ति मे तथापि भक्तिः तरुणेन्दुशेखरे ॥

शिवकेशवयोः भेदाभावेपि विष्णुकथाभ्यः अपि लोके शैवकथानां प्रचारः विरलतरो वर्तते । शोधनिबन्ध निर्माणे शिवकेशवयोः अन्यतरस्य लीलावर्णनं शोध्यवस्तुरूपेण स्वीकार्य इति मतिरासीत् । श्रीमद्रामायणभारतभागवतपुराणेषु दृष्टाः विष्णुकथाः अधिकृत्य आविष्कृताः शोधनिबन्धाः परश्शतं दृष्टाः । अतः शैवं वाङ्मयं शोधनीयमिति बुद्धिरासीत् । लोके प्रसिद्धासु शिवकथासु इतिहासपुराणेषु दृष्टासु कापि प्रसिद्धा कथा ग्राह्या इति गुरोराज्ञया अष्टादशपुराणानां महाभारतस्य च शोधनं कृतम् । तासु कथासु दक्षयज्ञकथा, कुमारसम्भवकथा, समुद्रमथनकथा, त्रिपुरसंहारकथा, किरातार्जुनीयकथा, इत्येताः विशिष्टाः दृष्टाः । एतेषु पञ्चस्वपि परिशिष्टाः चतस्रः कथाः प्रागेव शोधनिबन्धेषु गृहीताश्च । अतः त्रिपुरासुरसंहारकथा भगवत्पराक्रमवर्णनात्मिका समीचीना इति शोध्यविषयतया गृहीता ।

## मुख्यांशाः – (Key words)

1.शल्यं कर्णस्य सारथिः भव इति दुर्योधन प्रार्थयामास, 2.कुलविवक्षा निराकरणम्, 3. वृत्तिगौरवम्, 4. त्रिपुरासुरजननम् – असुरेभ्यः ब्रह्मणा वरप्रदानम्, 5. मयेन लोहत्रयेण पुरत्रय निर्माणम् – त्रिपुरासुरैः देवपीडनम्, 6. राक्षसपीडिताः देवाः ब्रह्माणं शरणं ययुः – ब्रह्मणा ईश्वरः एव आश्रयणीयः इति कथनम्, 7. शङ्करस्य महादेवत्वम्, 8. रथकल्पनम्, 9.ईश्वरेण अभयप्रदानम्, 10. त्रिपुरदाहः ।

## प्रस्तावना

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥

अयं व्यासः वसिष्ठस्य नप्ता, शक्तेः पौत्रः, सत्यवतीपराशरयोः पुत्रः, शुकस्य पिता इति पौराणिकः सम्प्रदायः । अयं व्यासः अनन्तवेदराशिम् ऋग्यजुस्सामाथर्वणरूपेण चतुर्धा विभज्य वेदव्यासः इति ख्यातिम् अवाप । अस्य कृष्णः, कृष्णद्वैपायनः इत्यपि नामान्तराणि सन्ति । अष्टादशपुराणानि भगवता व्यासेन विरचितम् । महाभारतम् तेन महाभागेन विरचितम् । महाभारतम् जयशब्देन अभिधीयते । महाभारतम् पञ्चमोवेदः इति प्रसिद्धिः लोके विद्यते । उक्तं च भगवतैव–

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥[1]

एतेषु विषयेषु यद्यत् महाभारते वर्तते तदेव अन्यत्र वर्तते – यदिह नास्ति चेत् तर्हि तदन्यत्रापि नास्ति । महाभारते अनेकानि उपाख्यानानि सन्ति । तेषु त्रिपुरासुरसंहारोपाख्यानम् प्रसिद्धमस्ति । अस्मिन् त्रिपुरासुरसंहारोपाख्याने न केवलं आध्यात्मिकसन्देशाः सन्ति, अपि तु सामाजिकसन्देशाः अपि सन्ति । अस्मिन् ग्रन्थे समुपवर्णिताः सामाजिकसन्देशाः यथामति अस्मिन् शोधपत्रे मया परिशीलिताः ।

### 1. शल्यं कर्णस्य सारथिः भव इति दुर्योधन प्रार्थयामास –

संस्कृतपुराणेतिहासेषु प्रथमतया महाभारतेतिहासे कर्णपर्वणि त्रिपुरासुरसंहारकथा दृश्यते । द्रोणानन्तरं कर्णः सैन्याधिपत्ये दुर्योधनेन अभिषिक्तः । अर्जुनमभियोद्धुं मे कृष्णतुल्योसारथिः नास्ति अतः शङ्के इति कर्णः दुर्योधनमुवाच । अवशिष्टेषु महायोधेषु शल्यः एक एव रथचोदने कृष्णतुल्यः इति मत्वा शल्यं कर्णस्य सारथिः भव इति दुर्योधनः प्रार्थयामास ।

दुर्योधनस्य वाक्यं शृत्वा शल्यः कर्णसारथ्यं निराकुर्वन् एवमाह – अहं क्षत्रियः मूर्धाभिषिक्तः महारथः मम सदृशः योधः तव बले नास्ति सूतपुत्रस्य कर्णस्य सारथिः भवितुं नेच्छामि इति स्पष्ठमुवाच । दुर्योधनः पुनः शल्यमनुनीय एवमुवाच – पुरा ब्रह्मा एव स्वयं ईश्वरस्य सारथिः बभूव इति स्पष्ठमुक्त्वा त्रिपुरासुरसंहारकथाम् उक्तवान् । तां कथां शृत्वा सारथेः औन्नत्यं ज्ञात्वा शल्योऽपि कर्णसारथिः बभूव ।

### 2. कुलविवक्षा निराकरणम्

महाभारते लौकिक आध्यात्मिकश्च कश्चन सन्देशः अन्तर्भूतः प्रतिभाति। आदिपर्वणि अस्त्रविद्याभ्यासकाले जातिकृतो विवादः तीव्रतरः वर्णितः कर्णः सूतपुत्रः इति प्रसिद्धः शल्यः तावत् क्षत्रियः । शूद्रस्य कर्णस्य चतुर्थवर्णे जातस्य द्वितीयवर्णे जातः क्षत्रियः शल्यः कथं सारथिः भविष्यतीति शङ्का कर्णपर्वणि शल्येनैव उत्थापिता । आदिपर्वणि कर्णो न राज्यार्हः क्षत्रियकर्मणि न योज्यः इति भीमः कर्णमाक्षिपति ।

अङ्गराज्यं न युक्तं ते उपभोक्तुं नराधम ।

श्वा हुताश समीपस्थं पुरोडाशमिवाध्वरे ।।(2)

ततः दुर्योधनः व्यक्तिविषये सामर्थ्यमेव गणनीयं जातिः कार्यनिर्वहणे न कारणमिति कर्णं समर्थितवान् ।

आग्नेयः कृत्तिका पुत्रः रौद्रो गाङ्गेय इत्यपि ।
श्रूयते भगवान्देवः सर्वगुह्यमयो गुरुः ।।(3)

तदा स्वयं दुर्योधनः कर्णाय अङ्गराज्यं दत्वा राजानमकरोत् ।

आदिपर्वणि या कुलविवक्षा पुनः सैव शल्येन कर्णपर्वणि उत्थापिता ।

न क्षत्रियो वै सूतानां श्रृणुयाञ्च कथंचन अहं मूर्धाभिषिक्तो हि राजर्षिकुलजो नृपः । महरथः समाख्यातः सेव्यः स्तुत्यश्च वन्दिनाम्

सोऽहमेतादृशो भूत्वा नेहारिबलसूदनः ।
सूतपुत्रस्य सङ्ग्रामे सारथ्यं कर्तुमुत्सहे ॥(4)

एवं विधा कुलविवक्षा त्रिपुरासुरसंहारोपाख्यान कथनेन महर्षिणा निराकृता भवति इति वक्तुं शक्यते ।

## 3. वृत्तिगौरवम्

क्रियमाणे कर्मणि गौरवातिशयः दर्शनीयः तच्चकर्म लोक क्षेमङ्करं चेत् विशेषतः आत्मनि कुलादि अभिमानारोषः न कार्यः । **श्रमे गौरवं** इति पाश्चात्याः अपि इमङ्गी कुर्वन्ति ।

(Dignity of Labour) शत्रुसंहारे करणीये देवहितरूपे क्षेमे सम्पद्यमाने उपस्थितेषु साधनेषु आभिजात्यादि कारणैः विघ्नकरणं न युक्तमिति अस्मादुपाख्यानात् स्पष्टम् । रथिकः श्रेष्ठोपि स्वयं रथं चोदयितुं न प्रभवति । योद्धापि सारथिना विना विफलो भवति । अतः सारथेः स्थितावेव रथिकस्यापि गौरवं भवत्येव इत्यनेन यस्मिन् कर्मणि यो निपुणः स एव तत्कर्मकर्तुं प्रभवतीति, कर्मकरः नैपुण्यातिशयेन मान्यः इति सन्देशोपि अत्र गम्यते ।

कवचानि सशस्त्राणि कार्मुकं च पितामह ।
त्वामृते सारथिं तत्र नान्यं पश्चामहे वयम् ॥(5)

त्वं हि सर्वगुणैर्युक्तो दैवतेभ्योऽधिकः प्रभो ।
स रथं तूर्णमारुह्य संयच्छ परमान् हयान् ॥(6)

## 4. त्रिपुरासुरजननम् – असुरेभ्यः ब्रह्मणा वरप्रदानम्

देवासुरयोः मध्ये महासंग्रामः बभूवुः । तेषु तारकासुर निमित्तः संग्रामः, अन्यतमः, तारके हते सर्वे दैत्याः तदानीं पराजिताः ।

तारकस्य त्रय पुत्राः तारकाक्षः, कमलाक्षः, विद्युन्माली इति त्रयः ब्रह्माणमुद्दिश्य तीव्रं तपः तेपुः ।

तपसा प्रीतो ब्रह्मा तेभ्यः वरान् दातुं ऐच्छत् ते सर्वैः भूतैः सर्वदा अवध्यत्वं वरं वव्रिरे । ब्रह्मापि सर्वात्मना अवध्यत्वं अमरत्वं च न कस्यापि भवति अन्यं वरं वृणीध्वम् इत्यूचिवान् । तदा ते

समेत्य वरं वव्रिरे त्रीणि पुराणि आस्ताय इमं महीं सर्वेषु लोकेषु च विचरिष्यामः । "त्रिणि पुराणि प्रतिवर्षसहस्रं एकत्र मिलन्तु यदा त्रीणि पुराणि एकीभावं प्राप्नुवन्ति तदा महेश्वरः एकेन बाणेनैव तानि युगपत् हनिष्यति तदा अस्माकं मृत्युः भवतु" इति ।

सर्वलोकेश्वरं वाक्यं प्रणम्येदमथाब्रुवन् ।
अस्मभ्यं त्वं वरं देव संप्रयच्छ पितामह ॥(7)

वयं पुराणि त्रिण्येव समास्थाय महीमिमाम् ।
विचरिष्याम लोकेऽस्मिंस्त्वत्प्रसादपुरस्कृताः ॥(8)

ततो वर्षसहस्रे तु समेष्यामः परस्परम् ।
एकीभावं गमिष्यन्ति पुराण्येतानि चानघ ॥(9)

समागतानि चैतानि यो हन्यद्भगवंस्तदा ।
एकेषुणा देववरः स नो मृत्युर्भविष्यति ॥(10)

अगतिकः ब्रह्मा तेभ्यः तथा वरं दत्तवान् ।

## 5. मयेन लोहत्रयेण पुरत्रय निर्माणम् – त्रिपुरासुरैः देवपीडनम्

मयोऽपि स्वतपः बलेन त्रीणि पुराणि नर्ममे । तेष्वेकं पुरं काञ्चनेन निर्मितं तदन्तरिक्षे आसीत् योजनशतविस्तारं तावन्मात्रं आयतं च आसीत्। काञ्चनं पुरं ज्येष्टः तारकाक्षः गृहीतवान् । द्वितीयं पुरं राजतं काञ्चनपुरवत् आयतम् तत् कमलाक्षः गृहीतवान् । तृतीयं कृष्णायसा निर्मितं तत् पुरं विद्युन्माली गृहीतवान् । एतानि पुराणि उड्डयन शीलानि आसन् । तैः पुरैः ते अन्तरिक्षे विहरन्तः सर्वान् लोकान् बबाधिरे।

त्रीणि काञ्चनमेकं वैरौप्यं कार्ष्णायसं तथा ।
काञ्चनं दिवि तत्रासीदन्तरिक्षे च राजतम् ॥(11)

आयसं चा भवत्भौमं चक्रस्थं पृथिवीपते ।
एकैकं योजनशतं विस्तारायामतः समम् ॥(12)

गृहाट्टालकसंयुक्तं बहुप्राकारतोरणम् ।
काञ्चनं तारकाक्षस्य चित्रमासीन्महात्मनः ॥(13)

राजतं कमलाक्षस्य विद्युन्मालिन आयसम् ।
त्रयस्ते दैत्यराजानस्त्रील्लोकानस्त्रतेजसा ॥(14)

आक्रम्य तस्थुरूचुश्च कश्च नाम प्रजापतिः ।

राक्षसाः वरगर्विताः कामरूपिणः राक्षसगुरोः सर्वान् कामान् प्राप्य यथेच्छं विहरन्तः लोकान् बबाधिरे ।

## 6. राक्षसपीडिताः देवाः ब्रह्माणं शरणं ययुः – ब्रह्मणा ईश्वरः एव आश्रयणीयः इति कथनम् –

महेन्द्रोऽपि महता यत्नेन तानि पुराणि नाशयितुं कृतयत्नोऽपि वरबलेन विफलोऽभूत् । एवं सर्वथा अशक्तः पुराणां आस्कन्दने अशक्तः ब्रह्माणमेव शरणं गतः । एवं च विज्ञापनं चकार दुरात्मनः राक्षसाः सर्वे दुरान् द्विषन्ति तेषां वधोपायं ब्रूहि इति ।

ब्रह्मापि स्वयं दत्तं वरमपि उपसंहर्तुं अशक्नुवन् इन्द्रमेवं उवाच –

अहं सर्वेषु प्राणिषु तुल्यबुद्धिः अधार्मिकाः हन्तव्याः एवेति मे व्रतमपि वर्तते । किन्तु तानि दुर्गाणि पुराणि एकेषुणा भेद्यानि । तानि भेतुं शिवादन्यः न समर्थः अतः तमेव शरणं गत्वा योद्धारं वृणुत । स एव राक्षसानां हन्ता भविष्यति ।

एकेषुणा विभेद्यानि तानि दुर्गाणि नान्यथा ।
न च स्थाणुमृते शक्तो भेत्तुमेकेषुणा पुरः ॥(15)

ते यूयं स्थाणुमीशानं जिष्णुमक्लिष्टकारिणम् ।
योद्धारं वृणुतादित्याः स तान् हन्ता सुरेतरान् ॥(16)

एवं ब्रह्मणा बोधिताः सर्वे तमेव अग्रतः कृत्वा महेश्वरं शरणं ययुः । कैलासं गत्वा सर्वजगद्रूपं महेश्वरं दृष्ट्वा नमश्चक्रुः ।

## 7. शङ्करस्य महादेवत्वम् –

महान् चासौ देवश्च महान् देवः । देवेषु श्रेष्ठः इत्यर्थः एष शब्दः यौगिकः सर्वेषां नाम भवितुमर्हति । किन्तु सर्वैः देवैः बलार्धं प्रदानेन ईश्वरस्य बलं सर्वाधिकम् आसीत् । तदारभ्य एव महादेव शब्दः शिवे रूढः इति भारते स्पष्टम् ।

स तु देवो बलेनासीत्सर्वेभ्यो बलवत्तरः ।
महादेव इति ख्यातः ततः प्रभृति शङ्करः ॥(17)

ईश्वरः पुनः देवान् एवमुवाच – संग्रामयोग्यं रथं, धनुः, बाणं, कल्पयत ततः तान् पातयामि इति ।

## 8. रथकल्पनम् – युद्धसामग्री

त्रैलोक्यस्य मूर्तीः सर्वाः समेताः कृत्वा रथं कल्पयामासुः । विश्वकर्मा तद्रथं निर्मितवान् । विष्णुः, चन्द्रः, अग्निः, इति त्रयः समेताः शरः बभूवुः। अग्निः शरस्य शृङ्गमासीत्, चन्द्रः भल्लः (काण्डरूपः) आसीत्, विष्णुः कुङ्मलः आसीत् (शरमुखम्) । तत्र शरमुखे मुखं चन्द्रः तेजनं विष्णुः इति शृतिप्रमाणं नीलकण्ठीये दर्शितम् । एकस्मिन् शरे अवयव विभागः भारते एवं दृश्यते ।

विष्णुं सोमं हुताशं च तस्येषुं समकल्पयन् ।
शृङ्गमग्निर्बभूवास्य भल्लः सोमो विशांपते ॥(18)

कुङ्गलश्चाभवद्विष्णुस्तस्मिन्निषुवरे तदा ।
भूमिः स्वयं सर्वपर्वतसमेता रथो बभूव ।।(19)

तत्र रथस्य समस्तावयवानि येन येन भूतांशेन निर्मितानि इति द्वाविंशति श्लोकैः वर्णनं दृश्यते । मन्दरपर्वतः रथाक्षो बभूव, जङ्घ गङ्गा आसीत् अक्षाधारः काष्टं जङ्घ । दिशः विदिशश्च रथपरिवारः आसन् । नक्षत्रवंशः ईषा बभूव अश्वयाजनस्थले युगाक्षसन्धानं त्रिवेणुमयं काष्टं ईषा । वासुकिः कूमरः आसीत्, हिमवान् अपस्करः आसीत् । सारथेः योग्यमासनं अपस्करः, अपस्करो रथाङ्गम् इत्यपस्करो शब्दः निपातितः । एवं एकैकशः अवयवर्णनं दृष्टमपि येषाम् रथाङ्गानार्थः नीलकण्ठेन व्याख्यातः ते एव रथस्वरूपं बोधयितुं समर्थाः ।

एवं रथं साङ्गं सज्जीकृत्य देवाः शिवसमीपं गत्वा एवमूचुः – देवा विचित्रायुधयुक्तः रथः सज्जितो वर्तते, किन्तु सारथिः अन्वेष्टव्यः भवतः अभिमतः को वा सारथिः भविष्यति इति । यो देवः मत्तः अपि श्रेष्ठः सः सारथिः भवतु । ततो देवाः ब्रह्मणः समीपं गत्वा एवं प्रार्थयामासुः।

शङ्करः मदधिको सारथिः भवेदिति अस्मान् उक्तवान् पुरा त्वया राक्षसवधकर्मणि सहायको भविष्यामि इति वचः दत्तम् । अतः त्वमेव शिवस्य सारथिः भवितुमर्हसि इति ।

एवं देवैः प्रार्थितः ब्रह्मापि सारथिमङ्गीकृतवान् ।

## 9. ईश्वरेण अभयप्रदानम् –

परमेश्वरः सर्वदिव्यांशयुक्तं रथमारुह्य अभीषून्, प्रतोदं च गृहीतवान्। स्थाणुरपि दिव्यं रथं आरुरोह, रथारूढः ईश्वरोऽपि देवान् पुनः एवमुवाच – राक्षसाः अवध्याः इति युष्माभिः भीतैः न भाव्यम् । तान् राक्षसान् अनेन बाणेन हतान् इत्येव जानीत ।

न हन्यादिति कर्तव्यो न शोको वः कथञ्चन ।
हतानित्येव जानीत बाणेनानेन चासुरान् ॥(20)

## 10. त्रिपुरदाहः –

ब्रह्मणा चाल्यमानस्य रथस्य हयानां वेगतोलने उपमा नासीत् । महेश्वर पारिषदाः नृत्यन्तः, गायन्तः, मांसं भक्षयन्तः रथं अनुधावितवन्तः । ऋषयः गन्धर्वाः महेश्वरं तुष्टुवुः ततो ईश्वरः ब्रह्माणमेवं अवदत् यस्यां दिशि ते राक्षसाः तां दिशामुद्दिश्य रथः चोदनीयः । ब्रह्मापि आकाशं पिबद्भिः इति धावमानैः अश्वैः त्रिपुराभिमुखं रथं चोदयामास । नन्दीश्वरोपि जगत् भयङ्करं नादं कृतवान्। तस्य नादस्य श्रवणमात्रेण तारकनगरे वर्तमानाः राक्षसाः विनाशं गताः। अपरे राक्षसाः युद्धाभिमुखम् आगताः । तदानीं शिवः कोपेन बाणं सन्दधे धनुषः क्षोभेण रथोऽपि अवसीदति इव आसीत्। ततः सपदि शरमुखात् निर्गतः नारायणः वृषभरूपं धृत्वा रथं उद्धधार

तस्मिन्सोमाग्निविष्णूनां क्षोभेण ब्रह्मरुद्रयोः ।
स रथो धनुषः क्षोभादतीव ह्यवसीदति ॥(21)

ततो नारायणस्तस्माच्छरभागद्विनिः सृतः ।
वृषरूपं समास्थाय उज्जहार महारथम् ॥(22)

एवम्  उद्धृतं रथमास्थाय वृषभस्य मूर्ध्नि हयपृष्टे च आरूढः शिवः एककक्षागतं राक्षसपुरं ददर्श । तदा प्रभृति गवां खुराः द्विधा अभवन्। हयानां स्तनाः न अभवन् बलवता रुद्रेण अधिरोहणात् तेषामेवं गतिरभूत्। ततो रुद्रः शरं सन्धाय पाशुपतेनास्त्रेणाभिमन्त्रय पुराणि उद्दिश्य प्रयुक्तवान् । तदानीं एकतां गतानि त्रीणिपुराणि दृष्ट्वा शरं मुमोच । त्रीणि पुराणि युगपत् भुवि पेतुः त्रिपुरं च दग्धमासीत् । हरकोपाग्निः सपदि न शान्तः किन्तु देवेभ्यः अभयं दत्वा हरः क्रोधाग्निं उपसञ्जहार।

## उपसंहारः –

पुराणां संहर्ता रुद्रः एवेति निश्चयः सः यथा रथं चोदयितुं निर्दिशति तथैव सारथिना रथः चोदनीयः । एवं कथनेन समाजहिताय कार्यसाधने न्यूनाधिक भेदं परित्यज्य सर्वैः ऐकमत्येन भाव्यमिति लौकिकः सन्देशः त्रिपुरदाहवृत्तान्तात् अवगन्तव्यः ।

–0–

## सन्दर्भ – सङ्केताः

1. सुभाषितत्रिशती – वैराग्यशतकम् – 84 श्लो
2. महाभारतम् – आदिपर्वणि – 137/7 श्लो
3. महाभारतम् – आदिपर्वणि – 137/13 श्लो
4. महाभारतम् – कर्णपर्वणि – 32/49 श्लो
5. महाभारतम् – कर्णपर्वणि – 32/50 श्लो
6. महाभारतम् – कर्णपर्वणि – 33/11 श्लो
7. महाभारतम् – कर्णपर्वणि – 33/12 श्लो
8. महाभारतम् – कर्णपर्वणि – 33/13 श्लो
9. महाभारतम् – कर्णपर्वणि – 33/14 श्लो
10. महाभारतम् – कर्णपर्वणि – 33/18 श्लो
11. महाभारतम् – कर्णपर्वणि – 33/19 श्लो
12. महाभारतम् – कर्णपर्वणि – 33/22 श्लो
13. महाभारतम् – कर्णपर्वणि – 33/23 श्लो
14. महाभारतम् – कर्णपर्वणि – 33/44 श्लो
15. महाभारतम् – कर्णपर्वणि – 33/45 श्लो
16. महाभारतम् – कर्णपर्वणि – 34/13 श्लो
17. महाभारतम् – कर्णपर्वणि – 34/18 श्लो
18. महाभारतम् – कर्णपर्वणि – 34/72 श्लो
19. महाभारतम् – कर्णपर्वणि – 34/73 श्लो
20. महाभारतम् – कर्णपर्वणि – 34/83 श्लो
21. महाभारतम् – कर्णपर्वणि – 34/100 श्लो
22. महाभारतम् – कर्णपर्वणि – 34/101 श्लो

## उपयुक्तग्रन्थसूची

1. वेदव्यासमहर्षिः – महाभारतम् (नीलकण्ठीयव्याख्यापेतम्)
Oriental Books Reprint corporation
New Delhi – 1979.

2. बलदेवोपाध्यायः – पुराणविमर्शः –– चौखम्बासंस्कृतविद्याभवन्
वारणासी – 1969.

3. भर्तृहरिः – सुभाषितत्रिशति –– चौखम्बासंस्कृतविद्याभवन्
वारणासी – 2001.